संस्थापक-संपादक:
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कौ २८, २९
शनि. दि. २६ सप्टेम्बर,
३ ऑक्टोबर २०१५
भाद्रपद शु. १३, कृ. ६
शके १९३७, युगाब्द ५११७

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे

प्रकाशक:
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिम: उच्च-न्यायालय-
मार्ग:, नागपुरम् - ४४० ००१.

www.sanskritbps.org

संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभाया: मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/- | PRINTED MATTER | वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57

संपादिका
डॉ. लीना रस्तोगी

सहसंपादिकाद्वयम्
डॉ. वीणा गानु, डॉ. शारदा गाडगे

महात्मागान्धिजयन्त्यङ्कविशेष:

मर्कटत्रयस्य एतादृश्य: लीला: नैवापेक्ष्यन्ते महात्मना!



आश्वासनानि वितथानि तु राजनीत्याम्
सत्यं वदेदिह कदापि न नेतृवर्ग:।
सङ्केतयन् कपिरयं प्रथम: पुरस्तात्
दृष्ट्वाङ्गुलिं हि विदधाति मुखे स्वकीये॥१॥

हत्याबलात्कृतिपरं बहु मुष्ट कार्यम्
उत्कोच-वित्त-परिणाम-महाघनत्वम्।
नैतद् विलोक्यमिति नेतृजनं द्वितीय:
सङ्केतयन् कपिरयं वदनं पिधत्ते॥२॥



निर्वाचनस्य विषमे समये समाप्ते
कष्टानि नैव शृणुतां जनमानसानाम्।
हस्ताङ्गुलिं श्रवणयोरुपरि प्रकुर्वन्
सङ्केतमावहति चैष कपिस्तृतीय:॥३॥

● **डॉ. प्रशस्यमित्र: शास्त्री, रायबरेली**
(साहित्य अकादमी सम्मान एवं राष्ट्रपति सम्मान प्राप्त:)

वार्ता:



■ **लालबहादुरशास्त्री जयन्ती** - २ ऑक्टोबरदिनाङ्के सर्वत्र सोत्साहं सोपक्रमं जनै: अनुष्ठिता। 'जय जवान जय किसान' इति घोषणां कुर्वता प्रधानमन्त्रिणा शास्त्रिणा स्वनेतृत्वेन एव १९६५ तमे युद्धे विजय: अधिगत:।

■ **प्रधानमन्त्रिण: सप्ताहात्मिका अपूर्वा यात्रा** - सप्टेम्बरमासे २३ दिनाङ्के आयर्लण्डदेशे व्यापार-विनिमयादिवार्तालापं कृत्वा भारतीयसमुदायं सम्बोधितवान् नरेन्द्रमोदी। ततश्च २४-२५ दिनाङ्कयो: अमेरिकायां न्यूयॉर्कमहानगरे संयुक्तराष्ट्रसंघे मार्गदर्शनं विधाय, सङ्घस्यास्य सप्ततितमे जयन्तीसमारोहे विशिष्टातिथिश्चाभवत् स:। तत्र संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि भारताय स्थानं देयमिति साग्रहं प्रतिपादितम्। *(अस्मिन् विषये सम्पादकीयं द्रष्टव्यम्।)* २७ सप्टेम्बरदिनाङ्के गूगलोद्योगस्य प्रमुखं श्री फेस-बुक्-संस्थापकं **मार्कझुकेरबर्ग**महोदयं चापि मिलित्वा, संख्यात्मक-भारतविषये (डिजिटल-इण्डिया) चर्चितवान् मोदी। प्रमुखा: ४७ उद्योगपतय: मोदीवर्यं मिलितवन्त:।

■ संस्कृत-प्राध्यापिकाया: **कमल-बूटवर्याया: दु:खदं निधनम्** भौमवासरे २९ सप्टेम्बरदिनाङ्के नागपुरे। *(द्रष्टव्य: विशेष-श्रद्धाञ्जलि-लेख: षष्ठे पृष्ठे)*

■ महात्मगान्धे: जयन्त्यवसरे २ ऑक्टोबर-दिने झारखण्डप्रदेशस्य खुँटी-न्यायालयस्य सौरोजी-विद्युत-प्रकल्पं समुद्घाटितवान् प्रधान-मन्त्री नरेन्द्रमोदी। 'पर्यावरणस्य रक्षणम् उर्जाया: संवर्धनम्' इति विकासमन्त्रोऽपि तेन तदा प्रस्तुत:।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

संयुक्तराष्ट्रसङ्घे भारतस्य प्रभावः

सुविदितमिदं यत् द्वितीय-विश्वयुद्धानन्तरम् अन्ताराष्ट्रिय-सहकार्याय २४ ऑक्टोबर १९४५ दिनाङ्के संयुक्त-राष्ट्रसङ्घस्य संस्थापना अभवदिति। एवमैषमः सप्ततितमं जयन्तिवर्षम् अस्य सङ्घस्य। आदौ सङ्घेऽस्मिन् जगतः एकपञ्चाशत् देशाः सहभागिनः आसन्, सम्प्रति सा संख्या १९६ (देशाः) इति वर्तते। सङ्घटनस्यास्य भवन्ति षट् प्रमुखानि अङ्गानि यथा - सर्वसाधारणसभा (युएन्जनरलकॉन्सिल्), सुरक्षापरिषद्, न्यायविभागः, सामाजिकार्थिक-समितिः, न्यास-परिषद्, सचिवालयश्चेति। अखिले जगति जनसामान्यानां स्वास्थ्यम्, अन्नं, पर्यावरणम्, अर्थव्यवस्था, सुरक्षा, शान्तिः, सुसंस्कृतिः इत्येतादृशानां विषयाणां चिन्तनं, मन्थनं विधाय सदुपायान् संसूचयन्ति संयुक्तराष्ट्रसङ्घस्य विविधाः विभागाः। तथा हि विश्वस्वास्थ्य-सङ्घटना (WHO), विश्वान्नपरिषद्, विश्वाधि-कोशः (वर्ल्ड बँक), विज्ञान-सांस्कृतिकसमितिः (UNSCO) इत्यादयः। सङ्घस्यास्य स्थापनासमये परतन्त्रः भारतः स्वातन्त्र्य-युद्धे निमग्नः आसीत्। परकीयाङ्ग्लशासकाः संयुक्तराष्ट्रसङ्घे भारतस्य सहभागविषये उदासीनाः आसन्। परिणामवशात् राष्ट्रसङ्घस्य विविधेषु भागोपभागेषु भारतस्य प्रतिनिधित्वं नगण्यमिवासीत्। भारतस्य अनादिसिद्धं भूषणास्पदं जगद्गुरुपदं राष्ट्रमण्डले पूजनास्पदं नैवाभवत्।

वीटो नामकः एकाधिकारः

द्वितीय-युद्धावसरे ये प्रभावशालिनः देशाः जगति आसन्, ते एव तदा संयुक्तराष्ट्रसङ्घे अपि विशेषाधिकारान् गृहीत्वा शक्तिशालिनः सञ्जाताः। सुरक्षापरिषदि 'वीटो' नामकः अलोकतान्त्रिकः एकाधिकारः अमेरिका, रशिया, चीन, ब्रिटन प्रभृतिभिः देशैः स्वीकृतः, यः अद्ययावत् प्रचलति। परिणाम-वशात् अन्ये सदस्यदेशाः सुरक्षापरिषन्माध्यमेन स्वसुरक्षायाः समस्यानां निराकरणं कर्तुं नैव प्रभवन्ति। 'वीटो'-एकाधिकारस्य यथेष्टः दुरुपयोगः एभिः देशैः भृशं क्रियते। विश्वस्य बृहत्तमः लोकतन्त्रदेशः, लोकसंख्यायामपि द्वितीये स्थाने विराजमानः भारतः अस्याः सुरक्षापरिषदः सदस्यता प्राप्तुं कतिपयवर्षेषु विशेषाभियानं चालयति। केचन शक्तिप्रवराः देशाः भारतस्य तादृशं प्रवेशं विरोधयन्ति, क्वचित् वीटो-विशेषाधिकारमपिदुरुपयुज्यन्ते। वस्तुतः संयुक्त-राष्ट्रसङ्घस्य स्थापनावसरे यादृशी विश्व-परिस्थितिरासीत्, सा इदानीं परिवर्तिता, सदस्यदेशानां संख्याऽपि परिवर्धिता। विश्वस्य सांस्कृतिकार्थिक-मञ्चे विकसनशीलः भारतः राष्ट्रमण्डले पुनश्च जगद्गुरुपदमवाप्तुं सिद्धः वरीवर्ति। नैके प्रमुखाः देशाः तेषां राष्ट्राध्यक्षाश्च भारतस्य प्रगतिं स्तुवन्ति, परस्परवार्ताप्रसङ्गे भारतस्य सुरक्षापरिषदि स्थानाधिकारमपि स्वीकुर्वन्ति, परं साक्षात् राष्ट्रकुलसम्मेलने (वीटो) एकाधिकारमुपयुज्य भारतस्य प्रवेशं स्थगयन्ति।

भारतसर्वकारस्य प्रयासः

विगते राष्ट्रमण्डलसम्मेलने विदेशमन्त्री सुषमास्वराज्, स्वयं प्रधानमन्त्री नरेन्द्रमोदी, भारतस्य प्रतिनिधिमण्डलस्य सदस्याः च संयुक्तराष्ट्रसङ्घस्य कार्यकलापेषु सुधारविषये विशेषान् प्रयासान् कृतवन्तः। एते प्रयासाः सफलाः सञ्जाताः यतो हि सुधारविषये, सुरक्षापरिषदि भारतस्य प्रतिनिधित्व-विषये चर्चां कर्तुं राष्ट्रमण्डलेन अनुमतिः प्रदत्ता वर्तते। भारतस्य नेतृत्वे जपान-जर्मनी-ब्राजील् इति देशचतुष्टयस्य (जी-फोर) प्रभावेण एतत् सुयशः इदानीं लब्धम्। इतःपरं संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि अल्पदेशानाम् एकाधिकारः विलयं गमिष्यति, विकसनशीलानां देशानामपि मतं तत्र स्वीकृतं भविष्यति। एतेषां देशानाम् ऐक्यमेव संयुक्तराष्ट्रमण्डले अपेक्षितां सुधारणां विधत्तुं प्रभवेदिति आशास्महे। संयुक्तराष्ट्रसङ्घस्य सप्ततितमे जयन्त्यवसरे प्रौढचिन्तनं विधाय स्वकार्यपद्धत्यां स्वीकृतं परिवर्तनमिति शुभसङ्केतः खलु।

राष्ट्रसङ्घस्य सुरक्षापरिषदि-पञ्चदशसदस्य-देशाः भवन्ति, तेषु अमेरिका, रशिया, फ्रान्स, इङ्ग्लण्ड, चीन एते पञ्चदेशाः स्थायिसदस्याः, अपरे च दश द्विवार्षिकाः सदस्याः भवन्ति। यतो हि राष्ट्रसङ्घस्य सदस्यदेशानां संख्या वृद्धिङ्गता वर्तते, अतः सुरक्षापरिषदि पञ्चविंशतिः सदस्याः भवन्तु, येषु दश स्थायि-सदस्याः स्युः इत्येवं भारतेन सहैव अन्ये देशाः बहुकालादेव इच्छन्ति। स्थायिसदस्यत्वविषये भारतस्य निर्विवादः अधिकारः विद्यते। ऐषमः राष्ट्रसङ्घाधिवेशने विदेशमन्त्री सुषमास्वराज्, प्रधानमन्त्री मोदी च एतस्मिन् विषये सुयोग्यं प्रतिपादितवन्तौ। राष्ट्रसङ्घस्य वैश्विक-शान्ति-प्रयासेषु भारतस्य योगदानमनन्य-तमं भवति। शान्तिसेनायां भारतस्य सैनिकाः विपुलमात्रया वर्तन्ते। 'वसुधैव कुटुम्बकम्', 'माता भूमिः पुत्रोऽहं पृथिव्याः।' इत्यादृशी भवति भारतस्य संस्कृतिः। एतत् सर्वं साकल्येन विचार्य राष्ट्रमण्डले भारतः गौरवपदम् अधिगमिष्यति, इति निश्चप्रचम्।

● डॉ. चन्द्रगुप्त वर्णेकर

मृगपक्षिशास्त्राध्ययने सङ्गणकविज्ञानस्य उपादेयता

प्रस्तावना

बृहद्-प्राणिविज्ञानस्य महत्त्वपूर्ण-विभागरूपेण विलसति मृगपक्षिशास्त्रम्। प्राणिविज्ञानक्षेत्रे प्रायः त्रिलक्षाधिकाः पशवः अध्ययनविषयाः भवितुमर्हन्ति। पुनश्च केचन विज्ञानिनः प्राणि-श्रेण्यां जीवजन्तुभिः सह वनस्पतिवर्गस्यापि गणनं स्वीकुर्वन्ति, यतो हि तेष्वपि प्राणाः सञ्चरन्ति। तादृशं विस्तारितं प्राणिविज्ञानं मौलिकतया परसहस्रवर्षाणि यावत् संस्कृतसाहित्ये वेद-वेदाङ्ग-शास्त्र-पुराणग्रन्थेषु विलसति। तथापि विस्तारभयात्, प्रतीकात्मकानि उदाहरणानि प्रस्तूय हंसदेवस्य मृगपक्षि-शास्त्राध्ययने आधुनिकस्य सङ्गणकोपकरणस्य उपादेयता अस्मिन् शोधनिबन्धे प्रस्तुता वर्तते।

प्राणिवर्गस्य उत्क्रान्तिप्रक्रिया

आद्यपुरुषेण सहोत्पन्ना पाञ्चभौतिकी पर्यावरण-प्रकृतिः किल ब्रह्माण्डं परितः वातावरणस्य बल-तापमानानि सम्यक् संयुज्य गुणसूत्रानुसारं पेशी-तन्तुजालमयं तनुकोशं विरचयति यस्मिन् प्राणवायुसञ्चरणेन जीवधारी प्राणी प्रभवति। यथोक्तं तैत्तिरीय-संहितायाम् (३-१-४) **प्रजानन्तः प्रतिगृह्णन्ति पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तम्।** एवं प्राणिसृष्टिस्तु सरलेनैकेनैव जीवेन प्रारब्धा अभवत्। ततश्च प्राणिवर्गस्य उत्क्रान्ति-प्रक्रियामनुसृत्य एकस्माद् एव जीवात् भिन्न-भिन्न-प्रकारकाः एतावन्तो जीवाः सञ्जाताः। यथा संसूचयति हिरण्यगर्भसूक्तस्य अयं मन्त्रः

यः प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव।

अन्यच्च पुरुषसूक्तेऽपि -

तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्मात् जाता अजावयः॥

विष्णुपुराणे सप्त प्राणिप्रकाराः सूचिताः सन्ति -

एतान् ग्राम्यान् पशून्प्राहुरारण्याञ्श्च निबोध मे।
श्वापदो द्विखुरो हस्ती वानरः पक्षिपञ्चमः।
औदकाः पशवः षष्ठाः सप्तमासु सरीसृपाः॥

प्राणिविज्ञानस्य चर्चा स्मृति-धर्मार्थ-कामशास्त्र-ग्रन्थेषु, अमरकोषेष्वपि क्वचित् च ललितसाहित्येऽपि दरीदृश्यते। सम्प्रति अर्वाचीनानि यन्त्रोपकरणसाधनानि उपयुज्य बृहत् संस्कृतसाहित्ये वर्णितस्य प्राणिविज्ञानस्य अनुसन्धानं महत्त्वं भजते। तादृशः प्रयासः अत्र प्रस्तुतः।

मृगपक्षिशास्त्र-पुस्तकस्य गण-संयोजनम्

जैनमुनिना हंसदेवेन ईसवीये त्रयोदशतमे शताब्दे सहस्राधिकसप्तशत (१७०५) श्लोकात्मकं मृगपक्षिवर्गविषयकं प्राणिशास्त्रीयं पुस्तकमिदं सुविरचितमस्ति। तस्मिन् प्रथमे खण्डे ९८८ श्लोकेषु १२७ पशवः वर्गीकृताः सन्ति। तथा हि

मृगप्रकाराः (स्वरचितम्)

सिंहो व्याघ्रस्तरक्षुश्च भल्लूको गण्डको मृगाः।
गजाश्वोष्ट्रा गर्दभश्च वराह-महिषौ वृषः॥
गवयो हरिणश्चैव चमूरूर्वानरः पुनः।
शृगालश्च बिडालश्च मूषकः श्रेणयो वृकः॥
हंसदेवेन विश्लिष्टाः श्वानादिमृगजातयः।
द्वाविंशतिः प्रकारास्ते श्लोकबद्धाः सुवर्णिताः॥

तथा च द्वितीये खण्डे ७१७ श्लोकेषु १७ पक्षिणः प्रकाराः एवम् -

पक्षिप्रकाराः (स्वरचितम्)

हंसश्च चक्रवाक् पक्षी सारसाश्चातकादयः।
गरुडो गृधकाकौ च ह्युलूकः कौशिकस्तथा॥
शुकश्च कोकिलश्चैव मयूराः श्रेणयः पुनः।
पारावत-कपोतौ वा चाष कुक्कुटपक्षिणः॥
चटको लोहपृष्ठश्च खञ्जरीटः प्लवस्तथा।
जातयः पक्षिणः सन्ति हंसदेवेन वर्णिताः॥

एवं पद्यात्मके पुस्तकेऽस्मिन् प्राणिमात्रस्य सत्त्व-रजस्तमो-गुणानुरूपं त्रिवर्गीकरणं विधाय तेषां प्रजननं, रूपं, सङ्गोपनम्, आयुर्मानं, खाद्यान्नं, बाह्यलक्षणानि च प्रस्तुतानि वर्तन्ते। प्रत्येकं प्रकारस्य विविधाः उपप्रकाराः अपि भवन्ति। प्राणिमात्रस्य विभिन्नानि लक्षणानि वर्गीकरणस्य आधारभूतानि विद्यन्ते। साम्प्रतिके काले एतादृशं वर्गीकरणं, गवेषणं, विश्लेषणं च कर्तुम् अतीवम् उपयुक्तं संसाधनं भवितुमर्हति सङ्गणकोपकरणमिति।

उपकरणेनानेन न केवलं बृहत् प्राणिवर्गस्य गुण-संख्या-लक्षणात्मकं, सचित्रं, तालिकाबद्धं वर्गीकरणम् अनुक्रमेण सम्भवति, अपि तु अपेक्षितं पर्येषणं (search) विधाय दृक्श्राव्य-माध्यमेन सविवरणं, सचित्रं, सशब्दं, चलाचलं प्रस्तुतीकरणं च सुलभं भवति। सम्पूर्ण-पुस्तकस्यास्य यथावकाशं गणलेख-योजनं (Hypertext) विधाय, अपेक्षित-प्राणिनामोपरि टङ्कनेन (click) तस्य वर्णनं, छायाचित्रं, लक्षणानि, ध्वनिविशेषः इत्यादिकं तत्क्षणमेव गणफलके प्रदर्शयितुं शक्यते। तादृशः प्रकल्पः मृगपक्षिशास्त्राध्ययने गवेषणकार्ये च महत्त्वं भजते। गण-व्यतिकरणप्रणालीम् उपयुज्य यदि कानिचित् लक्षणानि, ध्वनि-रूपाणि च कस्मिंश्चित वन्यप्रदेशे, गिरिकन्दरे वा अन्यत्र वा आविर्भवन्ति, तर्हि तत्संविदः प्राणी तस्मिन् स्थाने विहरति, इत्येवं निर्धारितुं शक्यते। एतदर्थे विशिष्टः प्रत्यभिज्ञः गणक्रमः अपेक्ष्यते, यस्य गणप्रणाली-निर्माणं प्रस्ताविते प्रकल्पे साधनीयम् इति एवं संसूच्यते। अचिरादेव जपानदेशे यन्त्रयानस्य ध्वनिलक्षणानि ज्ञात्वा सङ्गणकोपकरणेन यानस्य दोषं परीक्षितुं गणप्रणाली विकसिता वर्तते। पुनश्च चलसङ्गणकाधिष्ठितैः संसाधनैः छायाचित्राङ्कनं, ध्वन्यङ्कनं च विधाय संस्कृतसाहित्ये

--- अग्रे चतुर्थे पृष्ठे

पितृपक्षः

भाद्रपदमासस्य कृष्णपक्षः, श्राद्धपक्षः पितृपक्षो वा महालयपक्ष इति उच्यते। एतानि दिनानि पूर्वजानां ऋषीणां च स्मरणस्य तर्पणस्य दिनानि सन्ति। **श्रद्धया यत् क्रियते तत् श्राद्धम्।** अस्माकं कल्याणार्थं यैः पूर्वजैः स्वजीवनमर्पितम् तेषां सर्वेषां श्रद्धया निष्ठया च स्मरणं कृत्वा, ते सम्प्रति यस्यां योन्याम् वर्तन्ते तस्यां योन्यां ते दुःखम् न प्राप्नुयुः, सुखं शान्तिं च लभेरन् इत्यर्थं पिण्डदानं तथा तर्पणं क्रियते। तर्पणस्य अर्थस्तृप्तिरिति।

हिन्दुधर्मे कार्तज्ञ्य भावनायाः स्थानम् उच्चतमम् अस्ति। इयं भावना अस्माकं मातृ-पित्रोः तथा पितॄणां कृते दृश्यते। मनुष्यः मातापित्रोः जीवतोः तयोः सेवां तु करोति एव किन्तु मरणपश्चादपि तेषाम् कल्याणस्य इच्छा श्राद्धद्वारा पूरयति। तथैव तेषाम् अपूर्णं कार्यम् अग्रे नयति अग्रे नेतुं वा प्रयतते। श्राद्धस्य इयं भावना महत्त्वपूर्णा भवति। शास्त्रे कथितमस्ति यत् पितृयाणेन गच्छन् जीवः पितृलोकं गत्वा अनन्तरं चन्द्रलोकं गच्छति। तत्र अमृतान्नस्य सेवनं कृत्वा निर्वाहं करोति। कृष्णपक्षेऽस्मिन् चन्द्रस्य कलया सह तद् अमृतान्नं क्षीणत्वं गच्छति। अतः तेषां वंशजैः कृष्णपक्षे तेषां कृते आहारप्रेषणम् करणीयमिति उचितं भवति। अतएव पिण्डदानस्य, श्राद्धस्य व्यवस्था अस्माकं पूर्वसूरिभिः कृता आसीत्। अमावस्यायां तिथौ पितृतर्पणम् अवश्यं करणीयम् इति पुराणे कथितम्। यैः संवर्धनं लालनपालनं च कृतम् अस्मासु ज्ञानं तथा धर्मसंस्काराः धारिताः, तेषाम् श्रद्धापूर्वकं स्मरणं कृत्वा तान् तर्पणैः श्राद्धैः च सन्तोषयन्तः एते पञ्चदश दिवसाः, श्राद्धपक्षः पितृपक्षः वा कथ्यन्ते। भाद्रपद-मासस्य कृष्णपक्षे कृतः श्राद्धविधिः गयाश्राद्धस्य महत्त्वं धारयति। पुराणे उल्लिखितं यत् भाद्रपदस्य कृष्णपक्षे अमावस्यायां तिथौ यदा चन्द्रसूर्ययोः युतिः वर्तते तदा सूर्यः कन्याराशौ तिष्ठति। अस्मिन् दिने अस्माकं पितरः यमलोकनिवासं त्यक्त्वा मृत्युलोके सूक्ष्म-स्वरूपेण वंशजानां गृहं वसन्ति। अतः अस्मिन् दिने यदा श्राद्धं क्रियते तदा पितरः सन्तुष्टाः भवन्ति। प्रतिव्यक्ति कानिचित् ऋणानि सन्ति। तेषु पितृऋणं एकम्। इदं ऋणं श्राद्धद्वारा अनृणतां गच्छति। अस्मिन् दिने तेषाम् एव स्मरणं करणीयम्। यैः भारतीयसंस्कृतेः बृहत् निधानं अस्मभ्यं दत्तम् तेषां ऋषीणाम् स्मरणं कृत्वा, तेषाम् ऋणात् मुक्तं भाव्यम्।

श्राद्धदिनानि अस्मान् मृत्योः स्मरणं कारयन्ति। मृत्युं पवित्रं मत्वा मयाऽपि पूर्वजाणां ऋषीणां च अनुसरणं कृत्वा मृत्युं गन्तव्यम् इति विचार्य सत्कर्मपाथेयं सङ्गृहीतव्यम्।

श्राद्धपरम्परां पालयित्वा अस्माभिः सांस्कृतिकं धनं संरक्षणीयम्।

श्राद्धात् परतरं नास्ति श्रेयस्करमुदाहृतम्।
तस्मात् सर्वप्रयत्नेन श्राद्धं कुर्याद् विचक्षणः॥

● सौ. वन्दना सुभाष गोखले

वार्ताः **काशीहिन्दुविश्वविद्यालये अन्ताराष्ट्रिया शोध-सङ्गोष्ठी** - २६, २७, २८ सप्टेम्बर-दिनाङ्केषु संस्कृत-विभागेन समायोजिता आसीत्। 'संस्कृतसाहित्ये भारतीयकलायाः सौन्दर्यस्य च तत्त्वम्' इति विषये देशविदेशेषु समागताः विद्वांसः, प्राध्यापकाः, संशोधकाः, छात्राश्च स्व-विचारान् प्रस्तुतवन्तः। तेषु प्रमुखाः अभवन् प्राध्यापकाः विश्वनाथभट्टाचार्यः, डॉ. अभिराजराजेन्द्र-मिश्रः, प्रा. कमलेशदत्तत्रिपाठी, प्रा. पी. एस्. फिलिओजा, प्रा. रेवाप्रसादद्विवेदी, प्रा. राधावल्लभत्रिपाठी, प्रा. नलिनी बलवीर, डॉ. रमाकान्तशुक्लः, प्रभृतयः। नागपुरात् प्रा. डॉ. विभा क्षीरसागरः, डॉ. आशाअम्भोरे, संस्कृत-विभागाध्यक्षा डॉ. शुचिता दलाल, सभासचिवः डॉ. चन्द्रगुप्तवर्णेकरः च स्वशोध-निबन्धान् प्रस्तुतवन्तः। अस्यां सङ्गोष्ठ्यां प्रत्येकं कार्यक्रमः विलम्बेनैव प्रारब्धः, प्रदीर्घाः चाभवन् प्रस्तावना भाषणानि, अथ च साधुवाद-प्रदर्शनम्। व्यवस्था उत्तमा आसीत्।

तृतीय पृष्ठतः अग्रे ---

मृगपक्षिशास्त्राध्ययने

वर्णितैः प्राणिभिः सह तुलनां कर्तुं शक्यते। सङ्गणकीय-तन्त्रस्यास्य योजना अत्र चित्रीकृता वर्तते -



एतादृश्यः गणयोजनायाः अतीवं सरलं स्वरूपं गणक्रमाधारेण सङ्गणकोपकरणेन अत्र प्रस्तूयते। एतस्य वैज्ञानिकगवेषणस्य विस्तारितः प्रकल्पः विद्यापीठानुदानायोगतः यथेष्टम् अर्थसाहाय्येन कर्तुं शक्यते। तादृशः प्रयासः करणीयः इत्येवं संसूच्यते एतस्मिन् प्रसङ्गे। इति शम्!

● डॉ. चन्द्रगुप्त श्रीधर वर्णेकरः

सिन्दूरप्रियो (हि) गणेशः

(आगामिवर्षे पुनः शीघ्रागमनाय आपृच्छ्यते भक्तैः गजाननः!)

भोः बालाः! जानीथ यूयम्! कथं गणेशः सिन्दूरप्रिय इति? श्रूयन्ताम् तर्हि सिन्दूर-वदनगणेशस्येयं कथा। गणेश-पुराणे निवेदिता।

गणपतेरुल्लेखवस्तु सर्व-प्रथमं ऋग्वेदे प्राप्यते। मूलतस्तु स परमात्मा/परब्रह्म एव। ॐ इति गणेशस्य स्वरूपम्। पार्वती शङ्करं पृष्टवती - ''नाथ, भवानेव श्रेष्ठतमो देवेषु तथापि भवान् सदा कस्मै भजन्नास्ते?'' ... शङ्कर उवाच - ''सत्व-रजस्-तम इति गुणत्रयम् यस्य स्वाधीनम् (अत एव) स 'गुणेशः'। तस्यैव परमात्मनः ध्यानमहं सदैव करोमि। / (तमेवाहं ध्याये नित्यम्।)

तमेव प्रसादयितुं पार्वत्या 'गं' इत्येकाक्षरमन्त्रस्य जपः द्वादशवर्षपर्यन्तं कृतः। कालान्तरेण षड्भुजधारी गणेशः **'मयूरेश्वर'** नामा पार्वत्याः उदरे शिशुरूपेण प्राकटयत्। स एव गुणानामीशः परमपुरुषः सिन्धुदैत्यस्य विनाशार्थम् अवातरत्।

एकदा शिवः ब्रह्मदेवं प्रति यातः। ब्रह्मदेवः तदानीं निद्राधीनः आसीत्। त्यक्तनिद्रेण तेन यदा जृम्भितं तदा कश्चन महाघोरः परं सुरूपः पुरुषः प्राकटयत्। उच्चैरगर्जच्च। ब्रह्मदेवेन **'सिन्दूर'** इति नामधेयं तस्य कृतम्। ''भवाँस्तु त्रैलोक्यमपि स्वाधीनं करिष्यति। स्वेच्छया यत्रकुत्रापि सञ्चरिष्यति निवसिष्यति च'' इति वरं प्राददात्। प्राप्तस्य वरस्य सत्यार्थप्रत्ययाय स ब्रह्मदेवम् एव आक्रमितवान्। तस्य - तदुद्धतत्वं ज्ञात्वा ब्रह्मदेवस्तं शशाप। ''भवान् 'असुरो' भविता'' इति। 'गजाननोऽवतारं गृहीत्वा त्वां हनिष्यतीति।

श्रुत्वा च तद् शापवचनं स सिन्दूरः कैलासं प्रापत्। शिवस्तु ध्यानमग्न आसीत्। इत्यवलोक्य स पार्वत्याः केशग्रहणमकरोत्। कोलाहलं श्रुत्वा शिवस्य समाधिः भग्नः। स सिन्दूरस्य पार्श्वे पलायनमकरोत्। पार्वत्या मयूरेश्वरस्य स्मरणं कृतम्। मयूरेश्वरः ब्राह्मणवेषेण सिन्दूर-शङ्करयोर्मध्ये प्राकटत्। सिन्दूरं चावदत् - पार्वतीं मह्यं प्रदेहि। भवान् शिवेन सह युध्यताम्। युद्धे यो विजयी भवेत् तस्मै पार्वती प्राप्स्येत। सिन्दूरः पार्वतीम् उज्झितवान्। शिवस्य परशोराघातेन प्रथमं तस्य शक्तिः क्षीणाऽभवत्। ततः त्रिशूलस्य प्रहारेण गलितगात्रः सः स्थानात् तस्मात् निर्गतः।

शिशुरूपं धारयन् गजाननः राजावरेण्यं प्रति गमनस्येच्छां प्रदर्शितवान्। ताभ्यां पुत्रप्राप्तेः वरः तेन प्रदत्तः आसीत्। पुत्रप्राप्तिस्तु तयोरमभवत्। परं राक्षसेनैकेन सोऽपहृतः। शिवेन नन्दीमाध्यमेन स गणेशः तत्र प्रापितः। मूर्च्छिता पुष्पिका (वरेण्यस्य भार्या) अद्भुतं बालकं दृष्ट्वा सचेता अभवत्। राज्ञा वरेण्येन मन्त्रिणां वचनेन स निर्जनं वनं प्रेषितः। तत्र पराशरमुनेः दृष्टिपथमायातः स बालकः। 'अयं तु साक्षात् परमात्मा इव विभासते''। इति ज्ञात्वा ससम्मानं तमानयत् आश्रमे। सिन्दूरासुरस्य आतङ्कवार्तायाः प्रतीक्षायामेव आसीत् सः। तस्य वधार्थं पाराशरऋषेराशीर्वचनं याचितं तेन शिशुना। हस्तयोः परशुं पाशाङ्कुशाश्च गृहीत्वा मूषकवाहनम् आरुह्य वधार्थमसुरस्य निरगच्छत् सः। सिन्दूरस्य पुरस्तात् स्थित्वा विराटस्वरूप-मधारयच्च। कण्ठं निगृह्य तस्य प्राणानपाहरत्। असुरः रुधिरस्य वमनमकरोत्। तस्य तद् रुधिरं गणेशेन सम्पूर्णं स्वशरीरे चर्चितम्। ततः प्रभृति गजाननः सिन्दूरप्रियोऽभवत्। अत एव पूजनात्पूर्वं भक्तजनाः गणेशं सिन्दूरेण लिम्पन्ति।

''सर्वांगी सुन्दर उटी शेन्दूराची''

''स जयति सिन्दुरवदनो देवो यत्पादपङ्कजस्मरणम्
वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम्॥

● **डॉ. विजया रामचन्द्र जोशी**

ऐ वतन! ऐ वतन! (शहीद चलचित्र)

भारतम्! भारतम्! तव शपथं हि मे।
अध्वनि ते ह्ययं प्राणत्यागोऽपि मे॥
पुष्पं क्वास्ति भुवि, तव चरणेषु वै
स्वीयशीर्षस्य दानं हि कुर्मो वयम्॥ध्रु.॥

कश्चित् पञ्जाबीयो, कश्चित् महाराष्ट्रीयः
कोऽपि यूपीजनो, कोऽपि वङ्गदेशीयः।
तव पूजानिमित्तं समासादिता
स्थाली वर्णान्विता भिन्नपुष्पशोभिता॥
मेधा कापि वा स्यात् किन्तु ध्येयमेकं नो
दीप्त्या दीप्तिं सुचित्तस्य ज्वालयामः॥१॥

हे मातः! कोऽपि त्वामन्यथा चिन्तयेत्
तस्य दुर्जनस्य नाशनं हि साधयामः।
तव देहे कदाचित् परः सङ्क्रमेत्
तस्य पादलक्ष्मनाशमनुक्षणं भवेत्॥
योऽपि अवरोध-अंशो मुखे आपतेत्
पादशक्त्या समाप्तिं तु पातयामः॥२॥

भगतसिंहस्य माता मा रोदीः त्वम्
मरणमासादितोऽपि अमर्त्यो नु सः।
अश्वमारुह्य सर्वः वधूं याचते
प्राणत्यागी हसन् क्वचित् जनो भवेत्॥
स्वातन्त्र्यं हि सदा नः प्रिया नायिका
तां विवाहेन बद्ध्वा लभामहे वयम्॥३॥

● संस्कृतानुवादः - **पराग जोशी,** क.का.सं.वि.

स्मृतिनिमित्तं लेख:

संस्कृतासक्ता प्रा. कमल बूटमहोदया

प्रा. कमल बूट महोदया २९ सप्टेम्बर २०२५ तमे दिवसे परलोकं प्रयाता। कर्करोगेण सह महता सहनशीलत्वेन सङ्घर्षयन्ती बूटमहोदया वयस: नवतितमे वर्षे नागपुरे सर्वान् स्नेहिजनान् विहाय दिवं गता। तत्रभवती नागपुरस्थे सुविख्याते एल्.ए.डी. महाविद्यालये प्रदीर्घकालपर्यन्तं संस्कृतस्य अध्यापनं कृत्वा १९८६ तमे वर्षे सेवानिवृत्ता। सेवाकार्यात् निवृत्ता बूटमहोदया अध्यापनकार्यात् कदापि न निवृत्ता। नागपुरविश्वविद्यालयस्य स्नातकोत्तर संस्कृतविभागे तया संस्कृतम् अध्यापितम्।

बूटमहोदया नाम चैतन्यपूर्णं व्यक्तित्वम्। बुटिबोरी-स्थिते बूटपरिवारे कनिष्ठकन्यारूपेण जाता इयं कमला कमलपुष्पवत् मृदुहृदया, मृदुभाषिणी च आसीत्। संस्कृत-साहित्ये तस्या: महती रुचि: आसीत्। कालिदासस्य 'शकुन्तला' तस्या: अतीव प्रिया। 'अभिज्ञानशाकुन्तलम्' इति नाटकं तस्या: कण्ठे एव आसीत्। बाणभट्टस्य समासप्रचुरा गद्यशैली तां सदैव आकृष्टवती। ''बाणभट्ट: बाणभट्ट: एव। नास्ति तत्सदृश: अन्य कोऽपि'' इति तस्या: दृढं मतम्।

बूटमहोदयाया: अध्यापनकौशलम् अनन्यसाधारणमासीत्। 'अध्यापनं नाम तस्या: श्वास: आसीत्। अध्यापनसमये तस्या: तल्लीनता सर्वाभि: संस्कृतच्छात्राभि: नैकवारं प्रत्यक्षीकृता। सा यावता कौशलेन 'अभिज्ञानशाकुन्तलं' पाठयति स्म तावता एव कौशलेन 'सिद्धान्तकौमुदी'मपि पाठयति स्म। भासस्य 'स्वप्नवासवदत्तं' पाठयितुं तस्या: अध्यापने या सरलता आसीत् सा एव सरलता तस्या: 'कादम्बरी'-पाठने आसीत्। शाकुन्तलस्य चतुर्थोऽङ्क: प्रतिवर्षं प्राध्यापिकाया: छात्राणां च नेत्रेभ्य: अश्रुधारा: अस्रावयत्। एष: आसीत् बूटमहोदयाया: कुशलताध्यापनस्य प्रभाव:। महोदयाया: सर्वा: छात्रा: तया अध्यापितान् सर्वान् ग्रन्थान् अद्यापि न विस्मृता:।

प्रा. कमलबूटमहोदया स्नेहमयी मूर्ति: आसीत्। तस्या: वात्सल्यं छात्राभि:, सहकारिभि: बन्धुजनैश्च सदैव अनुभूतम्। सर्वेषां विषये तस्या: मनसि केवलम् आत्मीयता एव आसीत्। नासीत् तत्र कस्यापि विषये क्रोध:, मत्सर:, स्पर्धाया: भावना वा। अत: सर्वा: छात्रा:, सुहृज्जना:, सम्बन्धिनश्च बूट-महोदयायां नितराम् अस्निह्यन्। नैका: छात्रा: बन्धव: तां द्रष्टुं सदैव तस्या: गृहम् आगच्छन्ति स्म। स्वसमस्या: निवेद्य तस्या: मार्गदर्शनम् इच्छन्ति स्म। सा अपि सदैव सर्वेषां सहर्षं स्वागतं कृत्वा संस्कृतकार्यार्थं प्रोत्साहयति स्म।

वाचनं, संस्कृतनाटकानि, पुष्पाणि, फलानि च इते तस्या: प्रिया: विषया:। सा सदैव वाचने स्वकालं यापयति स्म। महाविद्यालये सांस्कृतिकसमारोहे सा सदैव सक्रिया आसीत्। तस्या: अङ्गणोद्यानं तस्या: पुष्प-फल-प्रीतिं प्रकटयति।

बूटमहोदया संस्कृत-भाषा-प्रचारि-सभाया: आजीवन-सदस्या आसीत्। नागपुरविश्वविद्यालयस्य संस्कृत-अभ्यास-मण्डलस्य सदस्यत्वेन, पाठ्यपुस्तक-समितेश्च सदस्यत्वेन महोदयया कार्यं कृतम्। २००५ तमे वर्षे महाराष्ट्रशासनेन कालिदास-संस्कृत-साधना पुरस्कारेण महोदया सम्मानिता। महोदयाया: कवित्वशक्ति: अत्र विशेषोल्लेखमर्हति। तस्या: कविता: तस्या: निसर्गप्रेम स्पष्टयन्ति। किन्तु प्रसिद्धि-पराङ्मुखत्वात् न तया ता: कविता: प्रकाशिता:।

एतादृशी संस्कृतमयी चैतन्यमयी, वात्सल्यमयी बूट-महोदया कालेन कवलिता। महोदयाया: सर्वा: छात्रा: अनाथा: सञ्जाता:। सर्वेण हृदयानि शून्यतां गतानि। तथापि अन्तिम-श्वासपर्यन्तं तस्या: व्यक्तित्वे वर्तमाना: उत्साह:, चेतनां, जिजीविषा च अस्मान् सदैव प्रेरयेयु: इति विचार: मनसि दृढतम:। बूटमहोदयां प्रति शत-शत प्रणामा:।

डॉ. शारदा गाडगे

अहो भूतदया डॉ. कलाममहोदयस्य!

राष्ट्रपतिभवनस्य 'मुघल गार्डन' इति नाम्न: उद्यानस्य रम्य: परिसर:। अस्मिन् उद्याने तदानींतन: राष्ट्रपति: डॉ. ए.पी.जे. अब्दुलकलाम-महोदय: प्रतिदिनम् इव सुप्रभाते भ्रमणं कुर्वन् आसीत्। विहरन् तेन एक: मयूर: दृष्ट:। एतस्य मयूरस्य दक्षिणे नेत्रे ग्रन्थ्या (गाठीने) पीडितम् अस्ति इति तेन ज्ञातम्। झटिति तस्य आदेशेन वैद्या: आहूता:। ते मयूरस्य सम्यक् चिकित्सां कृतवन्त:। तदा स ग्रन्थि: साधारणी नासीत् अपि तु कर्करोगस्य आसीत् इति वैद्यै: निदानं कृतम्। तदनन्तरं मयूरस्य दक्षिणनेत्रस्य शल्यक्रियां कृत्वा स: ग्रन्थि: दूरीकृत:। मयूर: रोगमुक्त: अभवत्। राष्ट्रपतिमहोदयस्य प्रयत्नेन मयूरेण नवजीवनं प्राप्तम्।

२००४ तमे ख्रिस्ताब्दे एष: प्रसङ्ग: अभवत्। अनेन लघु-प्रसङ्गेन डॉ. कलाममहोदयस्य सहृदयता, भूतदया, तस्य सूक्ष्मनिरीक्षणं शीघ्रनिर्णय: च एते गुणा: प्रकटीभूता:। तथा च अस्माकं राष्ट्रस्य सर्वोच्चपदं अलङ्कुर्वन् व्यक्ति: अपि पशुपक्षिणां विषये कीदृश: संवेदनशील: अस्ति एतस्य परिचय: एव जगते अभवत्।

भूतदया नाम भारतीयसंस्कृते: महान् विशेष:। अनेन मार्गेण तेन भूतदयाव्रतम् एव आचरितम्। अस्मै प्राणिरक्षकाय पर्यावरणरक्षक-वैज्ञानिकाय आदरणीयाय भूतपूर्व-राष्ट्रपति--डॉ. कलाम-महोदयाय मम शतश: प्रणामा:।

सौ. अमृता मंदार देव

मासिकश्राद्धावसरे स्मरणं डॉ. नी. र. वऱ्हाडपाण्डे-महोदयानाम्

(उत्तरार्धः)

कथमपि भुवनेऽस्मिन् तादृशाः सम्भवन्ति!

डॉ. नी. र. वऱ्हाडपाण्डे-महोदयाः सभायाः अभिमान-भूमिरासीत्। तेषां वैदुष्यम् आत्मसंस्थं नासीत् तत्तु अन्य-संक्रान्ति-विशेषेण प्रास्फुरत् च। तेषाम् पाण्डित्यस्य प्रथमं स्फुरणं तैः तावत् ''नव्यन्याय अँड बुलिअन् अलजिब्रा इति विषयमधिकृत्य तैः दत्तेषु व्याख्यानेषु जातम्। विद्यार्थिदशायां नव्यन्यायस्य अत्यन्तम् आकर्षणं तेषाम् अवर्तत। विषयोऽयं तस्मिन् काले न केनाऽपि पाठयते स्म। स्वकीयां ज्ञानतृष्णां शमयितुं ते न्यायशास्त्रे इव व्याकरणे, व्याकरणे इव वेदान्ते गणिते इव भौतिकशास्त्रे समधिगतपाटवानां नागपुरनगरीललामभूतानां पण्डितवर्याणां प्रो. गो. के. गर्दे-महोदयानां सान्निध्यम् अकरोत्। नव्यन्यायस्य पङ्क्तिशः वाचनम् तैः गर्दे-महोदयानां साहाय्येन साधितम्। नव्यन्यायशास्त्रस्य पांङ्क्ताध्ययने स्वात्मा परिश्राम्यापि अस्य शास्त्रगतव्यूहनिर्णये काचिदन्या रीतिः अन्वेषणीया इति मनसि कृत्वा बुलियन-बीजगणितमाध्यमेन अनुमानप्रकरणं समाख्यातुं ते प्रवृत्ताः। संस्कृतं, तर्कः, गणितः इति विविधज्ञानशाखानां पाण्डित्यस्य आत्मनि अपूर्वं सङ्गमम् आविष्कुर्वन्तः ते अनुमानप्रकरणस्य सूत्राणाम् अन्वयं प्रख्यापयामासुः गणितज्ञानां तर्कशास्त्रप्रणयिनां संस्कृतज्ञानां च पुरस्तात्। इदमत्र अवधेयं यत् सरण्या अनया नव्यन्यायविषये गवेषणं प्रख्यापयितुकामाः डॉ. वऱ्हाडपाण्डे-महोदयाः आद्यः गवेषकः। तेषां गवेषणमेतत् ग्रन्थरूपेण अद्यापि न प्रकाशतां गतम् इत्यनुपेक्षणीया नूत्नता। दशवर्षादनन्तरं डॉ. बिमल-कृष्ण-मतिलाल-महोदयेन नव्यन्यायस्य कांश्चित् प्रकरणान् व्याख्यातुं सरणिरेषा उपयोक्तव्या इति सूचितम् (द्रष्टव्यम् - द कॅरेक्टर ऑफ लॉजिक् इन इंडिया। नव्यन्यायादनन्तरम् ''आर्याक्रमणमैथ्यमिति विषयः व्याख्यानमालारूपेण प्रस्तुतः डॉ. नी. र. वऱ्हाडपाण्डे-महोदयेन। 'आर्यन् इन्वेजन ए मिथ्' इति नाम्ना व्याहृतं व्याख्यानं श्रोतुं डॉ. वऱ्हाडपाण्डे-महोदयानां वैदुष्यं मौलिकान् विचारान् च निशम्य ते वऱ्हाडपाण्डे-महोदयानां शिष्यत्वम् आपुः। सभया उपचितस्नेहेन गुरुगर्वभारं वहन्तः ते तदानीन्तनं मुख्यमन्त्रिणं श्री सुधाकरराव-नाईक-महोदयं सभां समानीय मुख्य-मन्त्रि-सहायता-कोषात् पञ्चलक्ष-रूप्यकात्मकं दानं मुख्यमन्त्रिणः मुखेन समाश्वास्य सभाम् उपाकुर्वन्।

डॉ. नी. र. वऱ्हाडपाण्डे सभायाः भूषामणिरासीत्। तेषां पाण्डित्येन नैके गौरवप्रसङ्गाः सभया समनुभूताः। इसवीये १९८८ तमे वर्षे सभया जर्मनीदेशस्य महावाणिज्यदूतस्य (कौन्सुल जनरल ऑफ जर्मनी) डॉ. वोल्फगाङ्ग शुमान-महोदयस्य नागपुर-वास्तव्यकालमनुलक्ष्य 'कर्म ॲण्ड रिबर्थ' इति विषये एकं व्याख्यानं आयोजितमासीत्। व्याख्यानस्य आध्यक्ष्यं समाचरता डॉ. नी. र. वऱ्हाडपाण्डे-महोदयेन कृतां विषयस्य मीमांसां समाकर्ण्य 'अयं खलु विद्वान्' इति प्रशंसावचसा शुमान महोदयाः डॉ. नी. र. वऱ्हाडपाण्डे-महोदयान् अभिनन्दितवन्तः। संस्कृतपण्डितः सन्तोऽपि डॉ. वऱ्हाडपाण्डे-महोदयानाम् एकः विशेषः गुणः आसीत्। संस्कृतपण्डितेषु विरलतया विलसन्तम् आङ्ग्लभाषापाण्डित्यं डॉ. नी. र. वऱ्हाडपाण्डे-महोदयानां समादरभाजनम् अभवत्। 'ॲबिलिटिज् ॲण्ड एज्युकेशन' इति वऱ्हाडपाण्डे-महोदयानां ग्रन्थविषये लिखता प्रो. सोरेन्सन् महोदयाः उक्तवन्तः यत् डॉ. वऱ्हाडपाण्डे सुस्पष्टां प्रभावकारिणीं च आङ्ग्लीं लिखन्ति। वऱ्हाडपाण्डे-महोदयानां आङ्ग्लभाषायां लेखने वा व्याख्याने 'स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्' इति भारविवचनं प्रत्ययं जनयति। 'कालिदास ॲण्ड शेक्सपिअर' इति तेषां भाषणं अस्यानुभवस्य निदर्शनम्। संस्कृत-मूलाः आङ्ग्लशब्दाः इति अपूर्वः परम् अपूर्णः कोशस्तु तेषाम् आङ्ग्लभाषाप्रभुत्वस्य प्रत्यक्षं प्रमाणम्। अनितरसाधारणी तेषां स्मरणशक्तिः। भवतु कालिदासकाव्यं, जगन्नाथस्य गङ्गालहरी वा भास्कराचार्याणां लीलावती अथवा शेक्सपिअरस्य स्वगतानि। पद्यबन्धाः गद्यबन्धाश्च अनुलक्षितक्रमेण वऱ्हाडपाण्डे-महोदयानां ओष्ठयोः विलसन्ति स्म। एतादृशानां डॉ. नी. र. वऱ्हाडपाण्डे-महोदयानां निधनेन संस्कृत-भाषा-प्रचारि-सभायाः हितकर्ता, संस्कृत-भवितव्य-साप्ताहिकस्य अद्वितीयः सम्पादकः अस्मात् हृतः। विरलाः डॉ. नी. र. वऱ्हाडपाण्डे सदृशाः महानुभावाः। स्मर्यते वचनमिदम् -

'कथमपि भुवनेऽस्मिन् तादृशाः सम्भवन्ति'

● न. र. पत्तरकिने

डॉ. मधुसूदनपेन्नामहोदयायपण्डितसातवळेकरपुरस्कारः

कविकुलगुरु—कालिदास—संस्कृतविश्वविद्यालयेभारतीयतत्त्वज्ञानसंकायस्य अधिष्ठातृपदे कार्यरतः **डॉ. मधुसूदनपेन्ना**महोदयः २०१५ वर्षस्य कृते **पण्डितसातवळेकरपुरस्कारेण** पुरस्कृतः। **पद्मविभूषण पण्डितश्रीपाद—सातवळेकरमहोदयानां** स्मृतौ पुणेनगरस्थ—सातवळेकर प्रतिष्ठानेन अयं पण्डित—सातवळेकर—पुरस्कारः संस्थापितः। संस्कृतक्षेत्रे विशिष्टं कार्यकृतवद्भ्यः विद्वद्भ्यः प्रदीयते अयं पुरस्कारः। १९—०९—२०१५ तमे दिनांके पुण्यनगरे आयोजिते विशिष्ट कार्यक्रमे पुरस्कारः प्रदत्तः। नागपुरस्थेभ्यः महाकवि—श्री. भा. वर्णेकरमहोदयेभ्यः पुरापुरस्कारोयं प्रदत्त आसीत् इति कार्यक्रमे विशेषस्मरणम् आसीत्। पेन्ना मधुसूदनमहोदयः इतःपूर्वं युवविपश्चित् संस्कृतपण्डित इत्यादि पुरस्कारान् अवाप्नोत्। तस्मै भूरि अभिनन्दनानि।

मुण्डकोपनिषद्

उप नि पूर्वस्य षदलृ धातोः क्विप् प्रत्ययान्तं रूपम् उपनिषद् इति उच्यते। ब्राह्मण-आरव्यक-संहिता-उपनिषद् भेदेन विभक्तस्य वेदस्य अन्तिमो निर्णयात्मको भागः उपनिषदिति उच्यते। स च उपनिषद्भागः दार्शनिकजगति वेदान्तपदेन प्रसिद्धः। वेदान्ते विद्यमानेषु त्रिषु प्रस्थानेषु उपनिषद् प्रस्थानं अत्यन्तं माहात्म्यं प्रामुरव्यं च भजते।

ब्रह्मविद्याप्रतिपादिकानाम् आसाम् उपनिषदां संख्याविषये न तावत् निश्चयो वर्तते दार्शनिकजगति। तथापि मुक्तकोपनिषदि उपनिषदां संख्या अष्टोत्तरशतं (१०८) कथिता वर्तते। एतासु अष्टोत्तरशतम् उपनिषत्सु भगवत्पादानाम् आचार्यशङ्करावार्याणां भाष्येण अलङ्कृताः सन्ति ईशादि एकादश उपनिषदः। तासु च एकादशसु उपनिषत्सु अथर्ववेदेन सम्बद्धा उपनिषद् भवति मुण्डकोपनिषत्। मुण्डक शब्दस्य मुण्डितकेशः संन्यासी इत्यर्थः। एवञ्च संन्यासिनां कृते उपदिशति इयम् उपनिषद् इति ज्ञायते। कुतो वा केवलसंन्यासिनां कृते एव उपदिशति इयम् उपनिषद् इति पृष्टे सति उत्तरयति आचार्यः उपनिषद् व्यारव्यानावसरे यत् उपनिषदः ब्रह्मविद्याप्रतिपादकाः, तदर्थं सर्वाश्रमिणाम् अधिकारः अस्ति। किन्तु यद्यपि ज्ञानमात्रे सर्वाश्रमिणाम् अधिकारः वर्तते तथापि संन्यासनिष्ठैव ब्रह्मविद्यायाः मोक्षसाधनं भवति। अतः ये मुमुक्षवः सन्ति तान् संन्यासिनः मुमुक्षून् प्रति मोक्षमार्गम् उपदिशति इयम् उपनिषत्। एवं विशिष्य संन्यासिनां मुण्डकाणां कृते निर्मितायाम् अस्याम् उपनिषदि विषयविभाजनं त्रिषु मुण्डकेषु कृतं वर्तते।

अस्याः उपनिषदः महत्त्वं प्रतिपिपादयिषया श्रुतिः, उपनिषदः आरम्भे प्रथममन्त्रेणैव गरिष्ठां ब्रह्मविद्या-सम्प्रदाय-कर्तॄणां परम्परां वर्णयति यथा -

''ब्रह्मा देवानां प्रथमः सम्बभूव
विश्वस्य कर्ता भुवनस्य गोप्ता।
स ब्रह्मविद्यां सर्व विद्याप्रतिष्ठाम्
अथर्वाय ज्येष्ठपुत्राय प्राह॥''

अर्थात् देवानां ज्येष्ठः यः धर्मज्ञानवैराग्यैः सर्वान् इन्द्रादीन् देवान् अतिशेते सः ब्रह्मा इमां ब्रह्मविद्याम् अथर्वणे प्रथमम् उपदिदेश। स च अथर्वा तां ब्रह्मविद्याम् अङ्गिः नाम्ने महर्षये प्रोवाच। स च अङ्गिः पुनः भारद्वाजाय भारद्वाजः तामेव ब्रह्मविद्याम् अङ्गिरसे उवाच। पुनश्च शौनकः अङ्गिरसं यथाशास्त्रम् उपगतः सन् ब्रह्मविद्याविविदिशया पृष्टवान् यत् -

'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति।'

तदा शौनकं तं ब्रह्मविद्यामुपदिशति। 'द्वे विद्ये वेदितव्ये' इति स्म यत् ब्रह्मविदो वदन्ति परा चैवापरा इति।

अत्र विद्यायाः द्वैविध्यं प्रतिपादितं वर्तते। तत्र अपरा विद्या नाम वेदवेदाङ्गानि इति। इयं हि लौकिकी विद्या भवति। परा विद्या नाम यया नित्य-शुद्ध-बुद्ध-मुक्त-सत्यस्वभावम् अक्षरं ब्रह्म ज्ञायते इति। एवं परापराविद्ये अत्र प्रतिपाद्य मुमुक्षुणा अपरया विद्यया ब्रह्मज्ञानं सम्पादनीयमिति उपदिशति इयमुपनिषत्।

गुरोः सकाशादधीतेन सत्येन ब्रह्मविद्या सफला भवति इति अनया उपनिषदा प्रतिपाद्यते। मोक्षस्य प्राप्त्यर्थं गुरुमेव अभिगच्छेत् इति अस्याम् उपनिषदि श्रुतिः कथयति -

''परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥''

तदा शिष्यं परीक्ष्य गुरुः तं परां विद्यां बोधयति यया तदक्षरं ब्रह्म अधिगम्यते। एवञ्च परा विद्या गुरुमुखादेव अवगन्तव्या इत्यत्र बोधितम्।

द्वितीयमुण्डके तावत् अक्षरं ब्रह्म सकल जगदुत्पत्तिस्थिति-लयकारणं भवति इति प्रतिपाद्यते। 'तदेतत्सत्यं ...' इ. मन्त्रेण। एवञ्च समग्रस्यापि अस्य परिदृश्यमानस्य प्रपञ्चस्य उत्पत्ति-स्थितिलयकारणं ब्रह्म इति प्रतिपाद्य सर्वमिदं जगत् अक्षरं ब्रह्मैव भवति न ब्रह्मभिन्नं किञ्चित् अत्र वर्तते इति प्रतिपाद्यते।

''पुरुष एवेदं विश्व कर्म तपो ब्रह्म परामृतम्' इत्यादि। एतादृशजगतः कारणं यः वेत्ति सः मोक्षं प्राप्नोति इति अक्षर-दर्शनस्य फलमत्र प्रतिपादितमस्ति। यथा -

''भिद्यन्ते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥''

न केवलं ब्रह्मविद्या अपि तु इतरशास्त्रोपकारकं ज्ञानम् अपि अस्याम् उपनिषदि वर्तते। अलङ्कारशास्त्रस्य शास्त्रत्वप्रतिपादने अस्याः उपनिषदः मन्त्राः पुरस्कृत्य वेदसम्बन्धः प्रदर्श्यते।

''द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते।
तयोरेकः पिप्पलं स्वादु अत्ति
अनश्नन् अन्यो अभिचाकशीति॥''

दर्शनशास्त्रस्य मूलं तत्त्वम् अस्मिन् मन्त्रे रूपकालङ्कार-नियोजनया दर्शितं वर्तते।

एवमेव ब्रह्मविद्या-वेदवेदाङ्गशास्त्रादिज्ञानेन सह अस्याम् उपनिषदि व्यावहारिकज्ञानोपकारकाः मन्त्राः अपि विद्यन्ते। अस्माकं भारतदेशस्य, सर्वकारस्य च यत् घोषवाक्यं वर्तते तदपि अस्याम् उपनिषदि वर्तते यथा -

''सत्यमेव जयते नानृतम्। सत्येन पन्थाः विततो देवयानः।''

एवं ज्ञानस्य महान् राशिः मुण्डकोपनिषदि वर्तते अतः अस्याः महत्त्वं प्रामुरव्यं च राजतेतराम् इति न लेशमात्रोऽपि संशयः। इति शम्।

प्रा. पराग जोशी

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं राष्ट्रीयसंस्कृतसंस्थान, नई दिल्ली द्वारा प्रदत्तेन आंशिकार्थ सहाय्येन डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।